अङ्क-२६ वेदविद्या
जुलाई-दिसम्बर २०१५ ISSN-2230-8962

# वैदिकं लोकजीवनम्

**डॉ. बालकृष्णशर्मा**

'देवभाषा "सुरभारती" दैवीगवी' प्रभृत्यभिधानैः प्रथितायाः संस्कृतभाषायाः लोकोत्तरमाहात्म्यमसाधारणसामर्थ्यञ्च को न जानाति सहृदयवरेण्यः संस्कृतभारती-समुपासकः? इयम्भाषा खलु वेदोपवेदवेदाङ्गानेकशास्त्रकल्पसूत्रप्रभृतिनानाप्रकार-साहित्यगर्भा भावाभिव्यञ्जनायाम-सामान्यसामर्थ्यशालिनी लोकवेदोभयव्याकरण-पद्धतिपरिनिष्ठिता प्राच्यभाषाशेखरीभूता भारतीयज्ञानविज्ञानविद्याशेवधिसंरक्षिका भारताभिज्ञानभूता मानवीयसभ्यताविकाससाक्षिणी परापुराणी सत्यपि नित्यनवीना आकाश्मीरात् कन्याकुमारीं यावल्लब्धप्रसरा लोकजीवनचित्रणचातुरीचमत्कृता श्रेयः प्रेयसित्युभयशास्त्रसमलङ्कृता श्रवणोचितसामगानमधुरलयनादझङ्कृता मानवनिसर्ग-सम्बन्धपरिपोषिका विशालशब्द-राशिनिर्भरा च शोभतेतराम्। ईदृश्यामस्यां गुण-गणान्वितायां देवभाषायां निबद्धं साहित्यं वैदिकसंस्कृतसाहित्यं लौकिकसंस्कृत-साहित्यञ्चेति भेदाभ्यां द्विधोपविभक्तमिति नास्ति तिरोहितं विदुषाम्। तत्र वैदिकसाहित्ये चतुर्णां वेदानां संहिताग्रन्थाः ब्राह्मणग्रन्थाः आरण्यकग्रन्थाः उपनिषत्ग्रन्थाः शिक्षाकल्पनिरुक्तग्रन्थाश्च प्राधान्येन समाहिताः भवन्ति। एतेषु सर्वेषु ग्रन्थेषु समुपनिबद्धं लोकजीवनमेव वैदिकं लोकजीवनमिति ज्ञातुं शक्यते। अथवा वैदिकसाहित्ये समुल्लिखितं वर्णितं चित्रितञ्च लोकजीवनं वैदिकं लोकजीवनमिति कथ्यते। अत्र वैदिकसाहित्ये यथाप्रसङ्ग चित्रितं लोकजीवनमधिकृत्य रचितोऽयं निबन्धः समासेन।

वस्तुतो वैदिकसाहित्ये संहिताब्राह्मणारण्यकोपनिषत्कल्पसूत्रशिक्षानिरुक्तादि-ग्रन्थानां समाहारो भवति तथापि साहित्यमिदं वैदिकमिति नाम्ना व्यवह्रियते। अत्र प्राधान्येन व्यापदेशाः भवन्ति' इति न्यायेन वैदिकसाहित्ये चतुर्णां वेदानाम्प्राधान्यात् साहित्यस्यास्य वैदिकसाहित्यमिति व्यवहारः प्रसिद्धः। प्रसङ्गेऽस्मिन् वैदिकलोक-जीवनज्ञानाय सर्वप्रथमं वेद शब्दः एव ज्ञातव्यः। व्याख्यासापेक्षस्य वेद शब्दस्य एका प्रथिता परिभाषा अस्ति।

**इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः इति।**[१] परिभाषायामस्यां कस्मै इष्टप्राप्तिः कस्य चानिष्टस्य परिहारः इत्यत्र लोकः सन्निहितोऽस्ति। अर्थात् लोकार्थमिष्टप्राप्त्य-लौकिकमुपायं वेदयति वेदः। एवमेव लोकस्यानिष्टपरिहारस्यापि अलौकिकमुपायं वेदयति वेदः एव। परिणामतः वेदः लोकसापेक्षः प्रतिभाति। एतस्मादेव कारणादस्माकं संस्कृत्यां शास्त्तेषु वा लोकेवेदे

[१] कृष्णयजुर्वेदसायणभाष्यभूमिकायाम्

सदृशः व्यवहारः पौनः पुन्येन प्रचलितो दृश्यते। सङ्क्षेपेण वक्तुं शक्यतेयत् वेदेषु यथावसरं लोकस्य प्रचुरनिबन्धनं कृतमस्ति। तथ्यमिदम्मनसि निधाय वैदिकं लोकजीवनमधिकृत्य चर्चा अत्रोद्दिष्टा अस्ति।

वैदिकलोकजीवनसन्दर्भे लोकपदमपि व्याख्यासापेक्षं सम्यग्रूपेण च ज्ञातव्यमस्ति। किन्नाम लोक ? इति प्रश्नः चेत् क्रियते तदा समाधानरूपेण लोकस्य स्वरूपं निरूपणीयम्भवति। तत्र स्थावरजङ्गमात्मकलोकः एव लोकपदबोध्यः इति। अथवा स्थावरजङ्गमात्मकानां पदार्थानां व्यवहारः लोक इत्यभिधीयते। यथा दण्डिनोक्तम् -

**चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता।**[१]

नाट्यशास्त्राभिनवभारतीकारेणाभिनवगुप्तेन लोकः इत्थम्परिभाषितः -

**लोको नाम जनपदवासीजनः जनपदश्च देशः एव।**[२]

लोकस्थानयोः परिभाषयोः अभिनवगुप्तस्य परिभाषा वैदिकलोकजीवनमेव मनसि निधाय प्रदत्ता अस्ति। वेदेषु जनानां जनपदानाम्वा बहुत्र उल्लेखः प्राप्यते। जनपदवासीजनः एव लोकनाम्ना प्रसिद्धिः। परिणामतः वैदिकसाहित्ये यथाप्रसङ्ग समुल्लिखितानां तदानीन्तने समये वा विद्यमानानां लोकपदबोध्यानां जनपद-वासिजनानां जीवनमेव वैदिकं लोकजीवनमिति ज्ञातुं शक्यते। एतस्मिन् वैदिक-साहित्यचित्रिते लोकजीवने प्राकृतिकतत्त्वेषु जलवायुभूमिपावकादिषु दैवीभावना वनस्पत्यौषध्यादिषु चेतना यज्ञयागादिषु जनाभिरुचिः सत्सङ्गपरोपकारप्रभृति-सत्कार्येषु सर्वजनोन्मुखता असत्कार्यपराङ्मुखता सहावस्थानप्रवृत्तिः इन्द्रवरुण-मरुत्प्रजाप्रतिप्रभृतिदेवानां बहुमानता शिवसङ्कल्पकामना स्वदेशपक्षपातः विश्वबन्धुत्ववादः कर्तव्योन्मुखता अधिकारप्रदर्शनविहीनसहजता सत्यतपसोः प्रचारः अन्ये च सजातीयाः धर्माः प्रचलिताः आसन्। अनेन सहैव कृषिकर्ममहत्ता द्यूतक्रीडाप्रवृत्तिः सोमरसपानपरम्परा पशुपालनानिवार्यता लोकमङ्गलभावना समूहवासप्रवृत्तिः इत्येतानि सर्वाणि तत्त्वानि वैदिकलोकजीवनेसम्पृक्तानि आसन्। तदानीन्तनं लोकजीवनं यज्ञधूमाकुलं नदीजलपूतं धेनुधावनसमुद्भूतरजोभिः समलङ्कृतं वनस्पत्यौषधिचेतनाचमत्कृतं जीवजन्तु-स्वच्छन्दविचरणशोभितं नैसर्गिकसुषमासमन्वितं सत्याचरणमण्डितं दुग्धपान-फलमूलाहारोर्जितञ्चासीत्। तदानीन्तने लोकजीवने द्यूतक्रीडायाः व्याप्तिः दृश्यते। तद्यथा

**अ॒क्षैर्मा दी॑व्यः कृ॒षिमित् कृ॑षस्व**
**वि॒त्ते र॑मस्व ब॒हु मन्य॑मानः।**
**तत्र॒ गावः॑ कितव॒ तत्र॑ जा॒या**
**तन्मे॒ विच॑ष्टे सवि॒तायम॒र्यः॥**[३]

यज्ञस्य बहुमानताऽवलोक्यते। तद्यथा -

---

[१] दण्डिनः काव्यादर्शे ३/१६३

[२] नाट्यशास्त्रम् १३/६९ अधिकृत्य अभिनवभारत्याम्

[३] ऋग्वेद १०/३४/१३

**अयं यज्ञो भुवनस्य नाभिः।**[1]

ग्राम्यसंस्कृतेः व्यापकता आसीत्। तद्यथा –

**विश्वं पुष्टं ग्रामेअस्मिन्ननातुरम्।**[2]

वायुमण्डलं पवित्रमासीत्। कल्याणमार्गानुसरणे लोकरुचिः आसीत्। तद्यथा -

**स्वस्ति पन्थानमनुचरेम।**[3]

**शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः।**[4]

सत्यमार्गाग्रहः सत्यमार्गानुसरणप्रवृत्तिर्वासीत्। तद्यथा -

**ऋतस्य पथा प्रेत।**[5]

त्यागानुप्राणित भोगवादः स्वीकृतः आसीत्। तद्यथा -

**ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्॥**[6]

दीर्घजीवनं जीवनपर्यन्तकार्यकौशलञ्च अभप्सितमासीत्। तद्यथा -

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः।**[7]

न्यायानुप्राणितसमीक्षापद्धतिः समादृतः आसीत्। तद्यथा -

**मित्रस्य चक्षुषा समीक्षामहे।**[8]

कृषिकार्यं सर्वजनमान्यं जीवनाधाररूपेण। तद्यथा -

**सुऽसस्याः कृषीस्कृधि।**[9]

शिवसंकल्पाग्रहः प्रचलितः आसीत्। तद्यथा -

**तन्मे मनः शिवसङ्कल्पमस्तु।**[10]

सामाजिकसमरसता परस्परसौहार्दभावना वा प्रचलिता आसीत्। तद्यथा -

**समानो मन्त्रः समितिः समानी**
**समानं मनः सह चित्तमेषाम्।**

---

[1] ऋग्वेद १/१६४/३५
[2] ऋग्वेद १/११४/१
[3] ऋग्वेद ५/५१/१५
[4] यजुर्वेद ३६
[5] यजुर्वेद ७/४५
[6] यजुर्वेद ४०/१
[7] यजुर्वेद ४०/२
[8] यजुर्वेद ३६/१८
[9] यजुर्वेद ४/१०
[10] यजुर्वेद ३४/१

**समानं मन्त्रमभिमन्त्रये वः**
**समानेन वो हविषा जुहोमि॥**[१]
**न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः।**
**अपास्मात् प्रेयान्न तदोको अस्ति पृणन्तमन्य मरणं चिदिच्छेत्॥**[२]

राष्ट्रोन्नतेः अभिलाषः राष्ट्रभक्तिः वा लोके दृढतया दृश्यते। तद्यथा -

**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।**[३]

एवम्प्रकारेण वैदिकलोकजीवनं पवित्रं नैसर्गिकव्यवहारसम्प्रोतं वैमनस्यरहितं राष्ट्रचेतनाचमत्कृतं दीर्घजीवनपुरस्कृतञ्चासीत्। वैदिकलोकजीवने स्वावलम्बनस्य माहात्म्यं स्वीकृतमासीत्। अतएव यजुर्वेदे सर्वाणि कार्याणि स्वयमेवानुष्ठातुं समादिष्टाः जनाः। तद्यथा -

**स्वयं वाजिँस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व।**
**महिमा तेऽन्येन न सन्नशे॥**[४]

विवेचनेनानेन प्रतिभाति यद्वैदिकसाहित्यम् आद्योपान्तं यज्ञानुष्ठानाक्षक्रीडाग्राम्य-परिवेशपञ्चमाभूतपूत-भावनासत्यमार्गाग्रहत्याग-

सम्पृक्तभोगदीर्घजीवनभिलाषकृषिकार्यपशुपालनशिवसङ्कल्पविश्वबन्धुत्वसामाजिकसमानताराष्ट्रभक्ति-लोककल्याणकामनाप्रभृतिलोकजीवनसम्बद्धचिन्तनैः सम्पृक्तमस्ति। अत्र तथ्यमिदमवधेयं यत् परवर्तिकाले यासां प्रवृत्तीनां दर्शनेन संस्कृतसाहित्यं महनीयतां गतमस्ति ताः सर्वाः प्रवृत्तयः मूलरूपेण वैदिकसाहित्ये सर्वप्रथम-मनुस्यूताः विद्यन्ते। अतएव वाक्यपदीयकारः भर्तृहरिः सर्वासां परवर्ति-प्रवृत्तीनामुपजीव्यभूतं वेदमुल्लिखति। तद्यथा –

**आदौ वेदमयीदिव्या यतः सर्वाः प्रवृत्तयः।**

तात्पर्यमिदं यत् सर्वे लोकव्यवहाराः वेदमूलकाः प्रचलिताः सन्ति येषामाचरणेन जनाः आत्मकल्याणेन सहैव लोककल्याणं कुर्वन्ति। अतएव वेदाः भारतीयसंस्कृते प्राणभूताः लोकजीवनाधाराः इष्टप्राप्त्युपायभूताः अनिष्टपरिहारसाधनभूताः चेति प्रथिताः।

**डॉ. बालकृष्णशर्मा**
साहित्यविभागाध्यक्षः,
शासकीयसंस्कृत महाविद्यालयः ग्वालियरम्

[१] ऋग्वेद १०/१९१/३
[२] ऋग्वेद १०/११७/४
[३] शुक्लयजुर्वेदे २२.२२
[४] तत्रैव २३.१५